# Bhavakritam Sankarshana Stotram

# ભવકૃતં સઙ્કર્ષણસ્તોત્રમ્

## Document Information

Text title : Bhavakritam Sankarshana Stotram

File name : bhavakRRitaMsankarShaNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 5/17/17-24||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2025

*sanskritdocuments.org*

# ભવકૃતં સઙ્કર્ષણસ્તોત્રમ્

શ્રીભગવાનુવાચ ।
ૐ નમો ભગવતે મહાપુરુષાય સર્વગુણસઙ્ખ્યાનાયા-
નન્તાયાવ્યક્તાય નમ ઇતિ ॥ ૧૭॥

ભજે ભજન્યારણપાદપઙ્કજં
ભગસ્ય કૃત્સ્નસ્ય પરં પરાયણમ્ ।
ભક્તેષ્વલં ભાવિતભૂતભાવનં
ભવાપહં ત્વા ભવભાવમીશ્વરમ્ ॥ ૧૮॥

ન યસ્ય માયાગુણચિત્તવૃત્તિભિ-
ર્નિરીક્ષતો હ્યણ્વપિ દૃષ્ટિરજ્યતે ।
ઈશે યથા નોઽજિતમન્યુરંહસાં
કસ્તં ન મન્યેત જિગીષુરાત્મનઃ ॥ ૧૯॥

અસદ્દૃશો યઃ પ્રતિભાતિ માયયા
ક્ષીબેવ મધ્વાસવતામ્રલોચનઃ ।
ન નાગવધ્વોઽર્હણ ઈશિરે હ્રિયા
યત્પાદયોઃ સ્પર્શનધર્ષિતેન્દ્રિયાઃ ॥ ૨૦॥

યમાહુરસ્ય સ્થિતિજન્મસંયમં
ત્રિભિર્વિહીનં યમનન્તમૃષયઃ ।
ન વેદ સિદ્ધાર્થમિવ ક્વચિત્સ્થિતં
ભૂમણ્ડલં મૂર્ધસહસ્રધામસુ ॥ ૨૧॥

યસ્યાદ્ય આસીદ્ગુણવિગ્રહો મહાન્
વિજ્ઞાનધિષ્ણ્યો ભગવાનજઃ કિલ ।
યત્સમ્ભવોઽહં ત્રિવૃતા સ્વતેજસા
વૈકારિકં તામસમૈન્દ્રિયં સૃજે ॥ ૨૨॥

એતે વયં યસ્ય વશે મહાત્મનઃ
સ્થિતાઃ શકુન્તા ઇવ સૂત્રયન્ત્રિતાઃ ।
મહાનહં વૈકૃતતામસેન્દ્રિયાઃ
સૃજામ સર્વે યદનુગ્રહાદિદમ્ ॥ ૨૩॥

યન્નિર્મિતાં કર્હ્યપિ કર્મપર્વણીં
માયાં જનોઽયં ગુણસર્ગમોહિતઃ ।
ન વેદ નિસ્તારણયોગમઞ્જસા
તસ્મૈ નમસ્તે વિલયોદયાત્મને ॥ ૨૪॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે પઞ્ચમસ્કન્ધે સપ્તદશાધ્યાયાન્તર્ગતં
ભવકૃતં સઙ્કર્ષણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૫/૧૭/૧૭-૨૪॥

bhAgavatapurANa . adhyAya 5/17/17-24..

Proofread by PSA Easwaran

*Bhavakritam Sankarshana Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*